**श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्**

**सत्रान्तपरीक्षा नवम्बर / दिसम्बर् - २०१६**

कक्षा- आचार्यः - २ (Sem – 3) **प्रश्नपत्रम् - ३** गुणाः - ७०

विषयः - वेदः **कोड - CC – 5.3.8** समयः- ११:०० तः २:००

सन्दर्भग्रन्थः - ऋग्वेदभाष्यभूमिका(सायणकृता)

दिनाङ्कः – २६-११-२०१६

---

प्रथमान्वितिः (युनिट - १)

**प्रश्नः -१ अधोलिखितयोरप्येकमेव सूत्रं व्याख्यायताम् ।** (४)

(क)तदर्थशास्त्रात् (ख) वाक्यनियमात् ।

**प्रश्नः- २ अधोलिखितयोः प्रश्नयोः एक एव समाधेयः ।** (१२)

(क)ऋग्वेदभाष्यभूमिकानुसारं ऋग्वेदस्याभ्यर्हिततत्वंविश्लेषयत ।

(ख)ऋग्वेदभाष्यभूमिकायाःपरिचयः प्रस्तूयताम् ।

**प्रश्नः -३ अधः स्थितेषु द्वयोरेव भावार्थो लेख्यः ।** (४)

(क)वेद एव द्विजातीनां निःश्रेयस्करः परः।

(ख)अधःस्विदासीदुपरिस्विदासीत्।

(ग)बुद्धशास्त्रात्

द्वितीयान्वितिः (युनिट - २)

**प्रश्नः -४ एकस्य उत्तरं लिखत ।** (१२)

(क)ऋग्वेदभाष्यानुसारं ब्राह्मणभागस्य प्रामाण्यमुपपादयत ।

(ख) अर्थवादस्य प्रामाण्यमधीतशास्त्रालोके विश्लेषयत।

**प्रश्नः -५ अधोलिखितयोरंशयोः एकस्यैवांशस्य व्याख्याविधीयताम्।** (४)

(क) स अरोदीत् यदरोदीत् तद्रुद्रस्य रुद्रत्वम्।

(ख)शास्त्रदृष्टिविरोधाच्च ।

**प्रश्नः -६ अधः स्थितेषु द्वयोरेव भावार्थो लेख्यः ।** (४)

(क)तथाफलाभावात्।

(ख)अनित्यसंयोगात्।

(ग)विधिनात्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः।

तृतीयान्वितिः (युनिट - ३)

**प्रश्नः- ७ द्वयोः किमपि एकम् उत्तरयत ।** (८)

(१) ऋग्वेदभाष्यभूमिकानुसारं मन्त्राणां सोदाहरणं लक्षणं लिखत।

(२) व्याख्यायताम्- शेषे ब्राह्मण शब्दः।

**प्रश्नः- ८ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्यैव समाधानं विधीयताम् ।** (४)

(क)वेदाध्ययनस्य महत्वविषये ऋग्वेदभाष्यभूमिकानुसारं यथाज्ञानं स्वविचारान् उपस्थापयत।

(ख)स्वाध्यायस्य फलं ऋग्वेदभाष्यभूमिकानुसारं लिखत।

**प्रश्नः- ९ अधोनिर्दिष्टेषु त्रयाणामेव शब्दानामर्थं विवृणुत ।** (३)

(क)परक्रिया (ख) पुराकल्पः (ग) विपश्चितः (घ) जुहोति (ङ) नाक

चतुर्थी अन्वितिः (युनिट – ४)

**प्रश्नः १० द्वयोः एकः प्रश्नः समाधेयः ।** (८)

(क)शिक्षायाः प्रयोजनमुपपादयत।

(ख)व्याकरणस्य वेदाङ्गत्वेन प्रयोजनं विश्लेषयत।

**प्रश्नः ११ अधोलिखितयोरेकस्यैव व्याख्या विधीयताम् ।** (४)

(क) त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयम्भुवा ॥

(ख) मन्त्रोहीनः स्वरतोवर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात् ॥

**प्रश्नः १२ अधोलिखितेषु त्रयाणामेव पदानामर्थमुपपादयत ।** (३)

(क) उत त्वः पश्यन् –इत्यत्र **त्व** –इति शब्दस्यार्थं लिखत ।

(ख) प्रतिसर्गः (ग) वंशानुचरितम् (घ) काकुद् (ङ)निगमः।

*************